International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(3): 55-56
© 2025 IJMH
www.themultijournal.com
Received: 19-06-2025
Accepted: 26-06-2025
Publish : 27-06-2025

**Dr. Veerendra Kumar V**
Lecturer in Sanskrit,
Ballari independent PU college,
Ballary 583104

**Correspondence:**
**Dr. Veerendra Kumar V**
Lecturer in Sanskrit,
Ballari independent PU college,
Ballary 583104

# श्रीमद्भागवते प्रकृतिपुरुषयोः स्वरूपम्

**Dr. Veerendra kumar V**

**ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।**
**ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा**[1] ॥

प्रशस्थः, नित्ययुक्तः भूम्ना भगनामकः सद्गुणसमुदायः यस्मिन् वर्तते सः भगवान्। भगवतः इदं भागवतम्। एवं भगवति भक्ताः भागवताः। भगवतः इदं भागवतानां इदं वा भागवतम्। श्रीमद्भागवतं च यद्यपिभक्ति शास्त्रसर्वस्वमिति प्रसिद्धम्। तथापि सांख्यदर्शनस्य योगदर्शनस्य च प्रशंसा श्रीमद्भागवते विस्तरेण वर्तते। श्रीमन्नारायणः एव स्वयं सांख्यं योगं च अस्मिन् महापुराणे शिष्यान् उपदिदेश। सांख्ययोगदर्शनयोः समग्रतत्त्वं श्रीमद्भागवते निरूपितम्।

पुराणं पञ्चलक्षणमिति यद्यपि प्रसिद्धं श्रीमद्भागवते पुनः विशेषतया दशलक्षणानि निरूपितानि। श्रीमद्भागवते द्वादशसु स्कन्धेषु द्वौस्कन्धौ कथाप्रवेशवर्णनेन उपोद्घातरूपौ। तृतीयस्कन्धादारभ्य सर्गादीनि लक्षणानि क्रमेण वर्णितानि। तृतीयस्कन्धे सर्गः निरूपितः। तत्र षड्विंशे अध्याये भगवान् सांख्यदर्शनमनुसृत्य सृष्टिक्रममुक्तवान् तस्मिन्नेवाध्याये सृष्टेः स्वरूपं, मोक्ष लक्षणं च उक्तवान्। तृतीयस्कन्धे ब्रह्मणः मानसपुत्रः स्वायम्भुवः मनुः दक्षपुत्रीशतरूपां उपयेमे। तयोः प्रभूतानां अपत्यानां मध्ये तिस्रः कन्याः प्रसिद्धाः।

आकूतिः, प्रसूतिः, देवहूतिः इति। ब्रह्मणा सृष्टः कर्दमप्रजापतिः बहुतिथं कालं श्रीमन्नारायणमुद्दिश्य तपश्चचार स्वायम्भुवः स्वपुत्र्यै देवहूत्यै कर्दमः एव योग्यः वरः इति निश्चित्य तां कर्दमाय ददौ। कर्दमदेवहूत्योः पुत्रः एव नारायणावतारः कपिलः। पुत्रजन्मानन्तरं कर्दमः तपसे वनं ययौ। ततः विषण्णां मातरं दृष्ट्वा नारायणावतारः कपिलः तां सम्पूर्णं सांख्ययोगम् अध्यापयामास। भूलोके प्रवृत्तस्य सांख्यदर्शनस्य कपिलः आद्यः इति निश्चयेन वक्तुं शक्यते। कपिलः स्वमातरं सांख्यदर्शनं योगदर्शनं च अधिकृत्य विस्तरेण उक्तवान्। तृतीयस्कन्धे षड्विंशे अध्याये सप्तविंशे अध्याये च सांख्यदर्शनम्, अष्टाविंशे अध्याये योगदर्शनं च उपवर्णितम्। एवं एकादशस्कन्धे श्रीकृष्णः स्वभक्तं उद्धवं सांख्यदर्शनम् उपदिदेश। एकादशस्कन्धे चतुर्विंशे, पञ्चविंशे चाध्याये सांख्ययोगनिरूपणं वर्तते।

**द्वितीयोऽध्यायः**

एकादशस्कन्धे एव पञ्चदशे अध्याये योगेन प्राप्यानां अष्टादशसिद्धीनां विशेषतः मानुषैः योगिभिः प्राप्यानां अष्टसिद्धीनां वर्णनं वर्तते। सांख्यं योगं च अतिरिच्य भक्तिज्ञानवैराग्ययोगत्रयाधिकारोपि एकादशस्कन्धे विंशे अध्याये अष्टाविंशे, एकोनत्रिंशे अध्याये च विस्तरेण उपवर्णितम्। पुराणं पञ्चलक्षण-मिति यद्यपि प्रसिद्धं श्रीमद्भागवते पुनः विशेषतया दशलक्षणानि निरूपितानि। श्रीमद्भागवते द्वादशसु स्कन्धेषु द्वौस्कन्धौ कथाप्रवेशवर्णनेन उपोद्घातरूपौ। तृतीयस्कन्धादारभ्य सर्गादीनि लक्षणानि क्रमेण वर्णितानि। तृतीयस्कन्धे सर्गः निरूपितः। तत्र षड्विंशे अध्याये भगवान् सांख्यदर्शनमनुसृत्य सृष्टि-क्रममुक्तवान् तस्मिन्नेवाध्याये सृष्टेः स्वरूपं, मोक्ष लक्षणं च उक्तवान्।

**प्रकृतिपुरुषयोः स्वरूपम्-**

(अ) पुरुषस्वरूपम् – षड्विंशे अध्याये प्रथमश्लोकद्वयेन सांख्यलक्षणं प्रयोजनं च स्पष्टं निरूपितवान्।

**अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक्।**
**यद्विदित्वा विमुच्यते पुरुषः प्रकृतेर्गुणैः ॥**
**ज्ञानं निश्रेयसार्थाय पुरुषस्यात्मदर्शनम्।**
**यदाहुर्वण्यये तत्ते हृदयग्रन्धिभेदनम्** [2]॥

पञ्चविंशति तमे अध्याये मनसः भगवदर्पणेन तीव्रेण भक्तियोगेन निश्रेयसोदयः भवतीति स्पष्टम् उक्तम्। निश्रेयः- शुभम्। तच्च निश्रेयसं मोक्षादन्यत् न भवति। निर्गतं श्रेयः निश्रेयसम्। बन्धविमुक्तः एव भक्तो भवति। बन्धविमुक्तिश्च ज्ञानात् भवति, ज्ञानेन कैवल्यं भवतीति कारणमाला सिद्धा। पुरुषः प्रकृतेः परः स च अनादिः अव्यक्तत्वात् आत्मा च। गुणत्रयातीतः इति हेतोः स्वयं ज्योतिः तं ज्ञात्वा अमृतः भवति। तमेवं विद्वान् अमृतत्वं ऐति नान्यः पन्था अयनाय विद्यते इति श्रुतेः।

पुरुषज्ञानादेव मोक्षः सांख्या इति ज्ञानवाचकः शब्दः। अतः सांख्यं ज्ञानयेग एवेति भगवान् श्लोकद्वये निरूपितवान्। यद्विदित्व येषां तत्वानां ज्ञानेन प्रकृतेः गुणैः प्रकृतिसंबन्धयुक्तैः सत्त्वरजस्तमोगुणैः विमुक्ते भवति। एवं तत् ज्ञानेन हृदयग्रन्थिभेदनं अर्थात् अज्ञाननिवृत्तिरपि भवति।

**भिद्यते हृदय ग्रन्धिः छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे**[3] ॥

इति भागवत वचनात् प्रमाणम्। एष पुरुषः अनादिः गुणरहितः प्रकृतेः परः जीवस्वरूपः अपि स्वयं प्रकाशयुक्तः विश्वं च पुरुषसमन्वितं पुरुषस्वरूपं च। किन्तु पुरुषः विश्वात् भिन्नः।

**प्रकृतिस्वरूपम् -**

प्रकृतिः सूक्ष्मस्वरूपा दैवी गुणमयी च। गुणाश्च सत्त्वरजस्तमोरूपाः। गुणैः पूर्णा, गुणैः युक्ता वा गुणमयी। गुणानां प्रकृतिभूता उत्पादिका इति हेतोः प्रकृतेः गुणानां प्रकृतित्वम्। अत्र आवरणविक्षेप शक्तिभेदेन प्रकृतिः द्विविधा। आवरणशक्त्या सा एव जीवोपाधिः अविद्यारूपा विक्षेपशक्त्या सैव माया परमेश्वरी।

**प्रकृतिपुरुषयोः सम्बन्धः -**

**अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः।**
**प्रत्यग्धामा स्वयं ज्योतिर्विश्वं येन समन्वितम्** ॥
**स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः।**
**यदृच्छयैवोपगतामभ्यपद्यत लीलया** ॥
**गुणैर्विचित्राः सृजन्तीं सरूपाः प्रकृतिं प्रजाः।**
**विलोक्य मुमुहे सद्यः स इह ज्ञानगुहाया** [4] ॥

यस्तु जीवरूपः पुरुषः सः इमां दैवीं प्रकृतिं प्रविश्य सत्त्वादिगुणैः ज्ञानं आच्छादयति। प्रकृतिरपि अजा अर्थात् जन्मरहिता। जीवः सत्त्वरजोयुक्तां प्रकृतिं प्रविश्य बहुविधाः प्रजाः जनयति। द्वितीयः तटस्थो भूत्वा अनुशेते। जीवः आत्मानं विस्मरति ईश्वरः सर्वं जानाति। अत्र श्रीधरीये उपनिषत् प्रमाणमपि निरूपितम्। अत्रावरणाविक्षेपशक्तिभेदेन प्रकृतिर्द्विधा, तत्र आवरणशक्त्या सैव जीवोपाधिरविद्या, विक्षेपशक्त्या सैव माया पारमेश्वरी। पुरुषश्च जीवेश्वररूपेण द्विविधः तत्र यः प्रकृत्यविवेकेन संसरति स जीवः, यस्तु प्रकृतिं वशीकृत्य विश्वसृष्ट्यादि करोति स ईश्वरः। तत्र प्रकृत्यविवेकेन जीवस्य संसारप्रकारमाह- स एष इति पञ्चभिः। सूक्ष्मामव्यक्ता दैवीं देवस्य विष्णोः शक्तिं लीलयोपगतां यदृच्छयैवाभ्यपद्यत इत्यन्वयः। तस्या लीलामाह – गुणैरिति। ज्ञानं गूहयत्यावृणोतीति ज्ञानगूहा तया। तथा च

श्रुतिः -

**अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्यः**[5]॥ इति।

मुमुहे आत्मानं विस्मृतवान्। एवं प्रकृतिपुरुषयोः सम्बन्धेन प्रकृत्या एव सत्त्वरजस्तमोभिः गुणैः एव सृष्टौ क्रियमाणायां भ्रान्तो जीवः प्रकृत्यध्यासेन आत्मनि कर्तृत्व सम्बन्धमारोपयति। पुरुषः सदा तटस्थः प्रकृतिरेव सांख्यमते सृष्टेः कारणं भ्रान्तः तत्र जीवात्मानं कारणं पश्यति इत्यर्थः। अज्ञः एव पुरुषे कर्तृत्वमारोपयति इति भगवतापि गीतासु स्पष्टम्।

तदुक्तं -

**प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।**
**अहङ्कारविमूढात्मा कर्ताहमिति मन्यते** ॥

अत्र अस्मत् शब्दः भगवता प्रयुक्तः इति अहङ्कारविमूढात्मा मां पुरुषं कर्तारं मन्यते इत्यन्वयो ग्राह्यः। व्याख्यास्वपि एवमेव निरूपितम्। व्याख्या – प्रकृतेः - प्रकृतिः प्रधानम् सत्त्वरजस्तमसां गुणानां साम्यावस्था। देवात्मशक्तिं स्वगुणैर्निगूढाम् इति श्रुतिप्रसिद्धा पारमेश्वरी शक्तिमायाख्या। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्। इति श्रुतेः। तस्या गुणैः विकारैः कार्यकरणरूपेण परिणतैः शरीरेन्द्रियैरिति यावत् क्रियमाणानि अनुष्ठीयमानानि सर्वशः सर्वैः प्रकारैरुपलक्षितानि कर्माणि लौकिकानि वैदिकानि च, अहङ्कारविमूढात्मा कार्यकरणसंघाते (पृथिव्यप्तेजोवाय्वाकाश गन्धरसरूपस्पर्श शब्दानां कार्याणाम्, करणानां च मनोबुद्ध्यहङ्कारचित्तश्रोत्रत्वक्चक्षुर्जिह्वानासिका हस्तपादपायूपस्थवाचाम् संघातः समूहो देहेन्द्रियरूपः तत्र) आत्मप्रत्ययोऽहङ्कारस्तेन विविधं नानाविधं मूढः स्वरूपविवेकहीनः आत्मा अन्तःकरणं यस्य सः। अविद्यया कार्यकरणधर्मा कार्यकरणाऽभिमानी देही अविद्ययैव अहंपदवाच्ये सच्चिदानन्दे आत्मनि निर्विकारे कर्तृत्वभोक्तृत्वादिरहिते कार्यकरणगतं कर्तृत्वम् अध्यस्य तत् तत्कर्मणाम्।

अहं कर्ता कर्तु शीलं यस्य स अस्ति इति मन्यते अभिमन्यते। कार्ता इति शीले तृन् प्रत्ययः। न लोका अव्ययनिष्ठाखलर्थतृनाम् इति षष्ठीनिषेधात् कर्माणीति द्वितीयान्तम्। सर्वस्य द्वे इति पाणिनीयसूत्रे द्रव्यप्रकाराऽवयवकात्स्र्यस्वपंवृत्तिः सर्वशब्दः इति कैयटोक्तेरत्र सर्वश इति सर्वप्रकारवची सर्वशब्दस्तस्मात्कर्मकारकवाचकाच्छाश् प्रत्ययः। अविद्याया कर्तृत्वं भोक्तृत्वं च आत्मनि निर्विकारे निष्क्रिये अभिमन्यमानः सन् तदभिमानरूपं सङ्गं कर्मणि कुरुते इति कर्मणि सज्जते अविद्वान् इत्यर्थः।

**सन्दर्भः**

1. वि.सह.-शङ्करभाष्यम् – 60 श्लो
2. श्री.भा – तृतीय. 26/1, 2 श्लो
3. श्री.भा. 1/2/21 श्लो
4. श्री.भा. – तृतीय. 26/3-5 श्लो.
5. श्री.भा . -3/26/5 श्लो. श्रीधरी.व्या. पु. सं. 57